**स्थलेरुहा** स्त्री स्थले रोहति रुह—क अलुक्स०। १घृतकुमार्य्याम् २दग्धारुहे च राजनि०।

**स्थलेशय** पु० स्थले शेते शी-अच् अलुक्स०। १वराहरुरुप्रभृतौ पशौ राजनि०। २स्थलशायिनि त्रि०।

**स्थवि** पु० स्था किच् वेर्नेत्त्व। १तन्तुवाये उज्ज्वलद०। २स्वर्गे ३जङ्गमे च संक्षिप्त०।

**स्थविर** न० स्था—किरच् स्थवादेशः। १शैलेये गन्धद्रव्ये राजनि०। २चतुर्मुखे ब्रह्मणि पु० हेमच०। ३अचले ४स्थिरे त्रि० उणा०। ५वृद्धे च त्रि० अमरः। ५महाश्रावण्यां स्त्री राजनि०।

**स्थविष्ठ** त्रि०अतिशयेन स्थूलः इष्ठन् यणादिलोपे गुणः। अतिवृद्धे अमरः। इयसुन् स्थवीयानपि अतिवृद्धे त्रि०स्त्रियां ङीप्।

**स्थाणु** पु० स्था नु पृषो० णत्वम्। १शिवे २शाखाशून्यवृक्षे च अमरः ३आयुधभेदे पु०नीलक०। ४वृद्धे त्रि० धरणि०। शिवस्य स्थाणुशब्दवाच्यत्वे कारणमुक्तं वामनपु०४६अ०। यथा “समुत्तिष्ठन् जलात्तस्मात् प्रजास्ताः सृष्टवानहम्। ततोऽहं ताः प्रजा दृष्ट्वा रहिता एव तेजसा। क्रोधेन महता युक्तो लिङ्गमुत्पाट्य चाक्षिपम्। उत्क्षिप्तं सरसो मध्ये ऊर्द्ध्वमेव यदा स्थितम्। तदाप्रभृति लोकेषु स्थाणुरित्येव विश्रुतम्”।

**स्थाणुतीर्थ** न० शैवे तीर्थभेदे वामनपु० १२अ०।

**स्थाण्डिल** पु० स्थण्डिले शयितोऽण्। व्रतार्थं स्थण्डिले शयितरि अमरः।

**स्थाण्वाश्रम** पुन० ६त०। हिमाचलस्थिते शिवस्य तपश्चरणाश्रमभेदे “स्थाण्वाश्रमं हैमवतं जगाम” कुमारः।

**स्थाण्वीश्वर** पु० शिवलिङ्गभेदे “स्थाणुनाम्ना हि लोकेषु पूजनीयो दिवौकसाम्। स्थाणावीशः स्थितो यस्मात् स्थाण्वीश्वरस्ततः स्मृतः” वामने ४२अ० तन्माहात्म्यादिकम्। तत्र दृश्यम्।

**स्थान** न० स्था—ल्युट्। १स्थितौ २सादृश्ये ३अवकाशे मेदि० ४सन्निवेशे ५वसतौ हेमच० ६पन्यसन्धौ त्रिका० ७भाजने हला० ८निकटे ९व्याकरणोक्ते प्रसङ्गे आदिश्यमानस्य यणादेः कारणभूते इगादौ। १० नीतिवेदिनामुपचयापचयहीने साम्यावस्थाने च अमरः। उपचयापचयौ च अष्टवर्गशब्दोक्तस्य कृष्यादेरेव भरतः। वसतिश्च लोकभेदः। स्वस्ववर्त्तिनां स्वस्वधर्मानुष्ठायिनां जनानां लोकविशेषात्मकं स्थानञ्च अग्निपु०उक्तं यथा “प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्। क्षत्रियाणां तथा चैन्द्रं संग्रामेष्वनुवर्त्तिनाम्। गान्धर्वं शूद्रजातीनां परिचर्य्यानुकारिणाम्। अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम्। स्मृतं तेषान्तु यत् स्थानं तदेव गुरुवासिनाम्। सप्तर्षीणान्तु यत् स्थानं स्मृतं तद्वत् वनौकसाम्। प्राजापत्यं गृहस्थानां गृहधर्मानुवर्त्तिनाम्। न्यासिनान्तु परं ब्रह्म योगिनाममृतं स्मृतम्। एकान्तवादिनां ब्रह्मध्यायिनां परमं पदम्। तामिस्रमन्धतामिस्रं महारौरवरौरवम्। असिपत्रवनं घोरं कालसूत्रमवीचिमत्। वेदस्य निन्दकानान्तु यज्ञव्याघातकारिणाम्। स्थानमेतत् समाख्यातं स्वधर्मविनिवर्त्तिनाम्” स्मृतिलिङ्गाधिकरणोक्ते ११क्रमे मीमां०। “स्थानं क्रमो योगबलं समाख्या पार्थसारथिः। १२ज्ञापके निग्रहस्थानमित्यादि।

**स्थानक** न० स्वार्थे क। १स्थानशब्दार्थे। स्थाने कं जलमत्र। २आलवाले हेमच०।

**स्थानचञ्चला** स्त्री स्थाने स्थितावपि चञ्चला। १वर्वरीवृक्षे शब्दच०। अल्पवातेन चञ्चलत्वात्तस्यास्तथात्वम्।

**स्थानच्युत** त्रि० स्थानात् स्वस्थानात् च्युतः। पदच्युते “स्थानस्थितस्य पद्मस्य मित्रे वरुणभास्करौ। स्थानच्युतस्य तस्यैव क्लेदशोषणकारकौ” गरुडपु० ११५ अ०। स्थानभ्रष्टादयोऽप्यत्र। “स्थानस्थिताश्च पूज्यन्ते पूज्यन्ते च पदस्थिताः। स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः” गरुडपु० ११५अ०।

**स्थानाध्यक्ष** त्रि० स्थाने अध्यक्षः। स्थानरक्षके हेमच०।

**स्थानिक** त्रि० स्थानेऽधिकृतः ठक्। स्थानाध्यक्षे हेमच०।

**स्थानिन्** त्रि० स्थानमस्यास्ति रक्ष्यत्वेन इनि। १स्थानरक्षके स्थानं प्रसङ्गः अस्त्यर्थे इनि। व्याकरणोक्ते आदिश्यमानस्य यणादेः कारणे इगादौ “स्थानिवदादेशोऽनल्विधाविति” पाणिनिः।

**स्थानीय** न० स्थीयतेऽस्मिन् स्था—आधारे अनीयर्। १नगरे अमरः। स्थानं सादृश्यं वासं वाऽर्हति स्थानस्येदम् वा छ। २वासयोग्ये देशे ३सदृशे ४स्थानसम्बन्धिनि च त्रि०।

**स्थाने** अव्य० स्था—ने। १योग्यत्वे २औचित्ये च “स्थाने भवानेकनराधिपः सन्निति” रघुः। ३सत्ये ४सादृश्ये ५कारणार्थे च शब्दर०।

**स्थापत्य** पु० स्थपतिरेव स्वार्थे ष्यञ्। १अन्तःपुररक्षके कञ्चुकिप्रभृतौ अमरः। तस्य भावः ष्यञ्। २स्थपतिधर्मे न०

**स्थापक** त्रि० स्थापयति स्था-णिच्—पुक् ण्वुल्। यथावस्थानमुचितं तथा निवेशके। स्थितिस्थापकः।